यूपकटकः, पुं, ( यूपस्य कटक इव । ) यज्ञसमाप्तिसूचकं पशुबन्धाद्यर्थं यज्ञभूमौ यत् काष्ठमारोप्यते स यूपः तस्य शिरसि वलयाकृतिर्ङ्गरका-कृतिर्वा यः काष्ठविकारः सः । यूपमूले निहितलोहवलय इति केचित् । इति भरतः ॥ तत्-पर्य्यायः । चषालः २ । इत्यमरः ।२।७।१८॥

यूपकर्णः, पुं, ( यूपस्य कर्ण इव । ) यूपैकदेशः । तत्पर्य्यायः । घृतावनिः २ । इति हेमचन्द्रः । ३ । ४८६ ॥

यूपद्रुः, पुं, ( युपाय द्रुः । ) खदिरवृक्षः । इति त्रिकाण्डशेषः ॥

यूपद्रुमः, पुं, ( यूपाय द्रुमः । ) खदिरवृक्षः । इति शब्दरत्नावली ॥ रक्तखदिरः । इति राज-निर्घण्टः ॥

यूपलक्ष्यः पुं, ( यूपो लक्ष्य लपवेशनार्थमस्य । ) पक्षी । इति शब्दमाला ॥

यूपाग्रं, क्ली, ( यूपस्याग्रम् । ) यूपस्याग्रभागः । तत्पर्य्यायः । तर्म्म २ । इत्यमरः । २ । ७ । १९ ॥

यूष, वधे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् । ) षष्ठस्वरी । यूषति । इति दुर्गादासः ॥

यूषं, पुं, क्ली, ( यूष्+कः । ) मुद्गादिक्वाथरसः । इत्यमरः । ३ । ५ । ३५ ॥ यूषोऽन्तःस्थादिः । चवर्गादिश्चेति मुकुटः । इति भरतः ॥ * ॥

अथ मुद्गयूषगुणाः ।

"मुद्गयषोऽम्लिदो हृद्यः शुद्धानां व्रणिनामपि ।
पथ्यो बलाशपित्तघ्नो ज्वरहा च क्षताक्षत ॥
अस्नेहलवणं सर्व्वमकृतं कटुकैर्विना ।
विज्ञेयं लवणस्नेहकटुकैः संस्कृतं कृतम् ॥
स तु दाड़िमम्रद्वीकायुक्तः स्याद्रागषाड़वः ।
रुचिर्ल्लघुपाकश्च दोषाणामविरोधकृत् ॥" *॥

मसूरयूषगुणाः ।

"मसूरयूषः संग्राही हृद्यो स्वादुः प्रमेहजित् ।
पित्तश्लेष्मज्वरहरस्तथातीसारनाशनः ॥" *॥

कुलत्थयूषगुणाः ।

"कुलत्थयूषोऽनिलहा शर्करास्मरिनाशनः ।
तूणीप्रतूणीकासार्शोगुल्ममेदःकफापहः ॥" *॥

अम्लेन सह माषयूषगुणाः ।

"अम्लमाषो गुरुर्भेदी वातघ्नो दीपनो मतः ॥"

अथ खड़यूषः ।

"तक्रं कपित्थचाङ्गेरीमरिचाजाजिचित्रकैः ।
सुपक्वं खड़यूषोऽयमयं काम्बलिकोऽपरः ॥" *॥

खड़काम्बलिकयूषगुणाः ।

"दध्यम्लो लवणस्नेहतिलमाषविपाचितः ।
खड़काम्बलिकौ यूषौ ग्राहिवातकफापहौ ॥"
इति राजवल्लभः ॥ * ॥

अपि च । अथ यूषस्य विधिर्गुणाश्च ।

"अष्टादशगुणे नीरे शमीधान्यसृतो रसः ।
विरलान्नि घनः किञ्चित् पेयातो यूष उच्यते ।
उक्तः स एव निर्यूहो रुचिकृच्च विशेषतः ॥"

यूषस्य प्रकारान्तरमाह ।

"कल्कद्वयपलं शुण्ठीं पिप्पलीचार्द्धकार्षिकीम् ।
वारिप्रस्थेन विपचेत्तद्भवो यूष उच्यते ॥"

अयमर्थः । यूषान्नं पलमितं तत् कल्कीकृतं शुण्ठी पिप्पली च समुदितार्द्धकर्षमिता कल्की-कृता उभयमपि प्रस्थमितेन वारिणा पचेत् । तद्भवो यूषः ।

"यूषो बल्यो लघुः पाके रुच्यः कण्ठ्यः कफापहः ॥"

अथ मुद्गयूषविधिः । वृन्दटीकायां तन्त्रान्तरे ।

"मुद्गानां द्विपलं तोये स्रुतमर्द्धाढ़कोन्मिते ।
पादस्थं मर्द्दितं पूतं दाड़िमस्य पलेन तत् ॥
युक्तं सैन्धवविश्वाह्वधान्यकैः पादकार्षिकैः ।
कणाजीरकयोश्चूर्णाच्छाणिकेनावचूर्णितम् ।
संस्कृतो मुद्गयूषोऽयं पित्तश्लेष्महरो मतः ॥" *॥

अथ मुद्गयूषगुणाः ।

"मुद्गानामुत्तमो यूषो दीपनः शीतलो लघुः ।
शोथार्शस्तुषगदाहकफपित्तज्वरास्रजित् ॥" *॥

अथ मुद्गामलकयूषगुणाः ।

"मुद्गामलकयूषस्तु भेदी पित्तानिलापहः ।
तृड्दाहशमनः शीतो मूर्च्छाश्रममदापहः ॥"

मसूरयूषगुणाः पूर्ब्ववत् । इति भावप्रकाशः ॥ ( तथा च ।

"कुलत्थयूषो मधुरः कषायः
कफं सपित्तं विनिहन्ति शीघ्रम् ।
मेहाश्मरी पायुजमेदहन्ता
सन्दीपनो मूत्रविशोधनश्च ॥
आढकयूषं मधुरञ्च शीतं
विशेषतो वातनिवारणञ्च ।
श्लेष्मापहं पित्तहरं नराणां
कृमिं निहन्यादपि दारुणञ्च ॥
शीतलं मधुरं मौद्गं यूषं पित्तविकारजित् ।
वातदोषहरं प्रोक्तं ज्वराणां शमनं परम् ॥
मासूरो ग्राहको यूषो हृद्यो स्वादुः प्रमेह-
जित् ।
पित्तश्लेष्मज्वरघ्नः स्यात्तथातीसारनाशनः ॥
कषायं कटुकञ्चोष्णं वातघ्नं पुंस्त्वदोषकृत् ।
रक्तपित्तं निहन्त्याशु चणाणां यूषमुच्यते ॥
घनं सवातं कफकृन्माषयूषं स पित्तकृत् ।
अम्लं पर्य्युषितं तच्च शस्यते तैलपाचने ॥
अन्यानि चैव शस्तानि कौलत्थान्युदितानि च ।
मसूराशिपुटा वल्याः कलायाद्याश्च वर्ज्जिताः ॥"
इति यूषविधिः ॥ * ॥

इति हारिते प्रथमस्थाने नवमेऽध्याये ॥

"श्रेयः पथ्यतमश्चापि मुद्गयूषः कृताकृतः ।
स तु दाड़िमम्रद्वीकायुक्तः स्याद्रागषाड़वः ॥"
"पटोलनिम्बयूषौ तु कफमेदोविशोषिणौ ।
पित्तघ्नौ दीपनौ हृद्यौ कृमिकुष्ठज्वरापहौ ॥
श्वासकासप्रतिश्याय प्रसेकारोचकज्वरान् ।
हन्ति मूलकयूषस्तु कफमेदोगलामयान् ॥
कुलत्थयूषोऽनिलहा श्वासपीनसनाशनः ।
तूणी प्रतूणी कासार्शोगुल्मोदावर्त्तनाशनः ॥
दाड़िमामलकैर्यूषो हृद्यः संशमनो लघुः ।
प्राणाग्निजननो मूर्च्छामेदोघ्नः पित्तवातजित् ॥
मुद्गामलकयूषस्तु ग्राही पित्तकफे हितः ।
यवकोलकुलत्थानां यूषः कण्ठ्योऽनिलापहः ॥"
इति सुश्रुते सूत्रस्थाने ४५ अध्यायः ॥ )

यूषः, पुं, (यूषतीति । यूष्+कः ।) ब्रह्मदारुवृक्षः । इति शब्दरत्नावली ॥

येष, ऋ ङ यत्ने । इति कविकल्पद्रुमः ॥ ( भ्वा०-आत्म०-अक०-सेट् । ) अन्तःस्थादिः । ऋ, अयियेषत् । ङ, येषते यियेषे । इति दुर्गा-दासः ॥

योक्ता, [ ऋ ] त्रि, योगकर्त्ता । इति युजधातोः कर्त्तरि तृन्प्रत्ययेन निष्पन्नम् ॥ ( यथा, वाज-सनेयसंहितायाम् । ३० । १४ ।

"मन्यवेऽयस्तापं क्रोधाय निसरं योगाय योक्तारञ्शोकायाभिसर्त्तारम् ॥"

"योक्तारं योगकर्त्तारम् ।" इति तद्भाष्यम् ॥)

योक्त्रं, क्ली, ( युज्यतेऽनेनेति । युज्+"दाम्नीशसयुयुजस्तुतुदेति ।" ३ । २ । १८२ । इति ष्ट्रन् । ) युगेन सह ईषादिकं आवध्यते अनेन तत् । योत् दड़ि इति भाषा । तत्पर्य्यायः । आवन्धः २ योत्रम् ३ । इत्यमरः । २ । ६ । १३ ॥ ( यथा, ऋग्वेदे । ५ । ३३ । २ ।

"स त्वं न इन्द्र धियमानो अर्कैर्हरीणां वृषन्
योक्त्रमश्रेः ॥"

"योक्त्रं नियोजनरज्जुं अश्रः आश्रयसि ।" इति तद्भाष्ये सायणः ॥ मन्थनरज्जुः । यथा, रामायणे । १ । ४५ । १८ ।

"ततो निक्षिप्य मथनं योक्त्रं कृत्वा च वासु-
किम् ।
मन्थानं मन्दरं कृत्वा ममन्थुरमितौजसः ॥")

योगः, पुं, (युज समाधौ+भावादौ यथायथं घञ् ।) सन्नहनः । उपायः । ध्यानम् । सङ्गतिः । युक्तिः । इत्यमरः । ३ । ३ । २२ ॥ ( प्रेम । यथा, देवीभागवते । ३ । १५ । ३३ ।

"क्षीयान् गुणान् प्रवितताम् प्रवदंस्तदासौ
तां प्रेमदामनुपकार च योगयुक्तः ॥"

"योगयुक्तः प्रेमयुक्तः ।" इति तट्टीकायां नील-कण्ठः ॥ कृतम् । इति मनुः । ८ । १६५ ॥ अस्य प्रमाणं योगदानशब्दे द्रष्टव्यम् ॥ ) अपू-र्व्वार्थसम्प्राप्तिः । वपुःस्थैर्य्यम् । प्रयोगः । विष्क-म्भादिः । भेषजम् । विस्रब्धघातकः । द्रव्यम् । कार्म्मणम् । इति मेदिनी ॥ नैयायिकः । धनम् । इति हेमचन्द्रः ॥ चारः । सूत्रम् । इति त्रिकाण्डशेषः ॥ * ॥ ( येन वाक्यं युज्यते स योगः । यथा,—

"तैलं पिबेच्चामृतवल्लिनिम्ब-
हिंस्राभयावृक्षकपिप्पलीभिः ।
सिद्धं बलाभ्याञ्च सदेवदारु
हिताय नित्यं गलगण्डरोगी ॥

सिद्धं पिबेदिति प्रथमं वक्तव्ये तृतीयपादे सिद्धं प्रयुक्तमेवं दूरस्थानामपि पदानामेकीकरणं योगः ।" इत्युत्तरतन्त्रे पञ्चषष्टितमेऽध्याये सुश्रुतेनोक्तम् ॥ ) अथ सप्तविंशतियोगानां नामानि । यथा,—